ॐ



*Compiled and presented by Eshwar Gopal / Ramakrishnan(Jr.)*

www.pradosham.com

# यजुर् उपाकर्मा

**उपाकर्मा – 27th August 2026 – सिम्हम् - 10 (आवणि 10) – गुरु वासरम्**

**(पराभव – दक्षिणायने - वर्ष ऋतौ - सिम्ह (श्रावण) मासे - शुक्ल पक्षे-(प्रातः ०९.०९ पर्यन्तम् चतुर्दश्याम् ततः पौर्णमस्यम्)-गुरु वासर -श्रविष्ठा नक्षत्रे – प्रात: 07.51 शोभन पर्यन्तं तत: अतिगण्ड नाम योग – प्रात: 09.09 पर्यन्तं वनजै तत: भद्रै करण)**

**गायत्री जपम् – 28th August 2026 सिम्हम् – 11 (आवणि 11) – भृगु वासरम्**

**(पराभव – दक्षिणायने - वर्ष ऋतौ- सिम्ह मासे – (शुक्ल पक्ष – पौर्णमास्यां प्रात: 09.48 पर्यन्तं, तत:) कृष्ण पक्षे - प्रथम्याम् – भृगु वासर - शतभिषक् नक्षत्रे – (प्रात: 07.23 पर्यन्तं अतिगण्ड) तत: सुकर्म नाम योग – (प्रात: 9.48 पर्यन्तं भव) तत: बालव नाम करण युक्तायां**

www.pradosham.com

# अनुक्रमणिका

1. समिदाधानम्
2. कामोकार्षीत्जपम्
3. माध्यान्निकम्, ब्रह्मयज्ञम् (देव तर्पणम्, ऋषि तर्पणम्, पितृ तर्पणं)
4. महा सङ्कल्पम्
5. यज्ञोपवीतधारणमन्त्रम्
6. काण्ड-ऋषि-तर्पणम्
7. वेदारम्भम्
8. गायत्रीजप सङ्कल्पम् (28th August 2026 भृगु वासरं)

———

www.pradosham.com

# ॥ 1. समिदाधानम् ॥

(आचम्या) शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

ओं भूः । ओं भुवः । ओꣳसुवः । ओं महः । ओं जनः । ओं तपः । ओꣳसत्यम् ॥ ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

ममोपात्त-समस्त-दुरित-क्षयद्वार श्री परमेश्वर-प्रीत्यर्थं प्रातः (morning) - सायं (evening) समीदाधानं करिष्ये । (लौकिकाग्निं प्रतिष्ठाप्य । अग्निमित्वा । प्रज्वालय – invoke Agni, when Jwaala rises, continue chanting below Prarthana Manthra) ॥

परित्वाग्ने परिमृजाम्यायुषा च धनेन च । सुप्रजाः प्रजया भूयासं सुवीरो वीरैस्सुवर्चा वर्चसा, सुपोषः पोषै-स्सुगृहो गृहै-स्सुपतिः पत्या सुमेधा मेधया सुब्रह्मा ब्रह्मचारिभिः । देवसवितः प्रसुवा । (तूष्णीं पिरषिच्य) ।

## ॥ अथ समिधमादधाति

(*offer single Samith Stick to Agni for each Svaahaakaaram if Samith not available use Dharba)* ॥

**(1) अग्नये समिध-माहार्षं बृहते जातवेदसे । यथात्वमग्ने समिधा समिध्यस एवं मामायुषा वर्चसा सन्यामेधया प्रजया पशुभि-र्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा । (2) एधोस्येधिषीमहि स्वाहा । (3) समिदसि समेधिषीमहि स्वाहा । (4) तेजोऽसि तेजो मयि देहि स्वाहा । (5) अपो अध्यान्वचारिषꣳरसेन समसृक्ष्महि । पयस्वाꣳअग्न आगमं तम्मा सꣳसृज वर्चसा स्वाहा । (6) संमाग्ने वर्चसासृज प्रजया च धनेन च स्वाहा । (7) विद्युन्मे अस्य देवा इन्द्रो विद्यात् सहऋषिभिस्स्वाहा । (8) अग्नये बृहते नाकाय स्वाहा । (9) द्यावापृथिवीभ्याꣳस्वाहा । (10) एषा ते अग्ने समित्तया वर्धस्व चाप्यायस्व च तयाहं वर्धमानो भूयासमाप्यायमानश्च स्वाहा । (11) यो माग्ने भागिनꣳसन्तमथाभागं चिकीर्षति। अभागमग्ने तं कुरु मामग्ने भागिनं कुरु स्वाहा । (12) समिधमाधायाग्ने सर्वव्रतो भूयासꣳस्वाहा । देवस्सवित: प्रासावी: स्वाहा (अथ तूर्ष्णीं समन्तं परिषिच्य) । अग्नये उपस्थानं करिष्ये ॥**

यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं, यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं । यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासं ॥ मयि मेधाम् मयि प्रजाम् मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ अग्नये नमः ।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतं तु मया देव परिपूर्णं तदस्तु ते ॥ प्रायश्चित्तान्यशेषाणि तपः-कर्मात्मकानि वै । यानि तेषा-मशेषाणां श्री कृष्णानुस्मरणं परम् ॥ कृष्ण कृष्ण कृष्ण – (अभिवादये नमस्कारः) ॥

(होमभस्म संगृह्य । वामकरतले निधाय । अदिभस्सेचयित्वा ॥ अनामिकया पेषयित्वा ॥) मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते । मेधावी भूयासम् (ललाटे) । तेजस्वी भूयासम् (दक्षिणबाहौ)। वर्चस्वी भूयासम् (सव्येबाहौ) । ब्रह्मवर्चस्वी भूयासम् (हृदये) । आयुष्मान् भूयासम् (कण्ठे)। अन्नादो भूयासम् (नाभौ) । स्वस्ति भूयासम् (शिरसि) ॥

श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् । आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन । श्रियं देहि मे हव्यवाहन ओं नम इति ॥ (आचम्य)

## ॥ 2. कामोकार्षीत्जप संकल्प: ॥

(आचम्य, पवित्रपाणि कुर्यात्) । शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजं । प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशन्तये …… शान्तये । ओम् भू: । ओॅंसुव: । ओं मह:। ओं जन: । ओं तप: । ओॅंसत्यं । ओं तत्सवितुवरेण्यं भर्गो देवस्य धीमहि । धियो यो न: प्रचोदयात् । ओमाप: ज्योतीरस: अमृतं ब्रह्मा भूर्भुवस्सुवरोम् …… ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थम् । शुभे शोभने मुहूर्ते अद्यब्रह्मण: द्वितीय परार्धे श्वेत वराह कल्पे वैवस्वत मन्वन्तरे, अष्टा विम्शति तमे, कलियुगे प्रथमे पादे जम्भूद्वीपे भारत वर्षे भरतकण्ठे मेरो: दक्षिणे पार्श्वे (Those staying in Middle East - पश्चिमे दिग्भागे उत्तरे पार्श्वे अराभ्य महा समुद्रे तीरे केतुमाल्य वर्षे दुबै/शार्जा/अबु दाभि महानगर्यां) शकाब्दे अस्मिन्, वर्तमाने व्यावहारिके प्रभवादीनां षष्ट्या: सम्वत्सराणां मध्ये …. ….. पराभव नाम सम्वत्सरे दक्षिणायने वर्ष ऋतौ सिम्ह (श्रावण) मासे शुक्ल पक्षे (प्रात: ०९.०९ पर्यन्तम् चतुर्दश्याम् तत:) पौर्णमास्यां शुभतितौ वासर: वासरस्तु गुरु वासर युक्तायां श्रविष्ठा नक्षत्र युक्तायाम् (प्रात: 07.51 पर्यन्तं शोभन तत: अतिगण्ड नाम योग युक्तायाम् (प्रात: 09.09 पर्यन्तं वनजै तत:) भद्रै नाम

करण युक्तायां एवङ्गुण विशेषण विशिष्टायां अस्यां वर्तमाणायां (प्रातः ०९.०९ पर्यन्तम् चतुर्दश्याम् तत:) पौर्णमास्यां, शुभतिथौ ममोपात्तसमस्त दुरित क्षयद्वारा श्री परमेश्वर प्रीत्यर्थं तैष्यां पौर्णमास्यां अध्यायोत्सर्जन अकरण प्रायश्चित्तार्थं अष्टोत्तर सहस्र सङ्ख्यया (शत सङ्ख्यया) `कामोकार्षीत् मन्युरकार्षीत्' इति महामन्त्रजपं करिष्ये । (cast away kattai pullu and wash hands) 3 प्राणायामं कृत्वा ….. प्रणवस्य ऋषिर्ब्रह्म देवी गायत्री छन्द: परमात्मा देवता भूरादि सप्त व्याहृतीनां अत्रि, भृगु, कुत्स, वसिष्ठ गौतम, काश्यप, आङ्गीरस ऋषय: गायत्री उष्णिक, अनुष्टुप्, भृहती, पङ्क्ति तृष्टुप्, जगत्य: छन्दागंसि – अग्नि, वायु, अर्क, वागीश वरुण इन्द्र विश्वे देवा: देवता: (10 वार प्राणायामं कुर्यात्) ॥इति सङ्कल्प्य ॥ 'कामोकार्षीत् मण्युरकार्षीत् नमो नम:' इति जपित्वा । (once this japam is over then ….. ममो पात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं कामोकार्षीत् जपम् उपस्थानं करिष्ये)

उत्तमे शिखरे देवीं भूम्यां पर्वत मूर्धनि । ब्राह्मणेभ्यो हनुज्ञानं गच्छ देवि यथा सुखं ॥ (2 वरं प्राणायामं, उपस्थानं कृत्वा) । पर्यन्तं, आचमनं, अङ्गवन्दनं कृत्वा । माध्याह्निकं अनन्तरम् ब्रह्मयज्ञं च कृत्वा ॥

## ॥ 3. ब्रह्मयज्ञः ॥

आचम्य ।

**शुक्लाम् ...... शान्तये । ओम् भूः ...... ममोपात्त समस्त..... श्री परमेश्वर प्रीत्यर्थम् ब्रह्मयज्ञं करिष्ये । ब्रह्मयज्ञेन यक्ष्ये ॥ विद्युदसि विद्य मे पाप्मान-मृतात् सत्यमुपैमि (हस्तावनिज्य । त्रिराजामेत् । द्विः परिमृज्य। द्विः परिमृज्य । सकृदुपस्पृस्य । शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य ।** *(wash your hands, do achamanam 3 times, clean your lips 2 times, wash hands, do prokshanam on feet, eyes, ears, nose, chest, keep hands together and continue…*)

**ॐ भूः -- तत्स॑वि॒तुर्वरे᳚ण्यं॒ । ॐ भुवः -- भर्गो॑ दे॒वस्य॑ धीमहि । ओꣳसुवः -- धियो॒ यो नः॑ प्र॒चोदया᳚त् । ॐ भूः -- तत्स॑वि॒तुर्वरे᳚ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि । ॐ भुवः -- धियो॒ यो नः॑ प्र॒चोदया᳚त् । ओꣳसुवः -- तत्स॑वि॒तुर्वरे᳚ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि धियो॒ यो नः॑ प्र॒चोदया᳚त् ।**

**हरिः ॐ । हरिः ॐ । ॐ अ॒ग्निमी᳚ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज᳚म् । होता᳚रं र॒त्नधात॑मम् ॥**

www.pradosham.com

हरि: ॐ । हरि: ॐ । ॐ **इषेत्वोर्जेत्वा वायवस्थ उपायवस्स्थ देवोवस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ हरि: ओं । हरि: ओं ॥** ॐ **अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥**

**हरि:** ॐ **॥ हरि:** ॐ **॥** ॐ **शन्नो देवीरभिष्टय आपो भद्रैन्तु पीतये । शंयोरभिस्त्रवन्तु न: ॥ हरि:** ॐ **। हरि:** ॐ **॥** ॐ भूर्भुवस्सुव: । सत्यं तप: श्रद्धायां जुहोमि । *(take uddharani water and sprinkle circumambulating your head, then….)*

ॐ **नमो ब्रह्मणे नमो अस्त्वग्नये नम: पृथिव्यै नम ओषधीभ्य: । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥ (chant 3 times)**

**वृष्टिरसि वृश्चमे पाप्मानं ऋतात् सत्त्यमुपागाम् । (हस्तावववानिज्य) देवर्षि-पितृ-तर्पणं करिष्ये ॥ (wash hands and proceed to Devatharpanam) ॥**

## ॥ देव तर्पणम् ॥

**(उपवीति-**Holy Thread on left shoulder**)** *– 1 Time Each* **ब्रह्मादयो ये देवास्तान् देवान् तर्पयामि । सर्वान् देवान् तर्पयामि । सर्वदेव गणान् तर्पयामि। सर्वदेवपत्नीस्तर्पयामि । सर्वदेवगणपत्नी: तर्पयामि ॥**

## ॥ ऋषि तर्पणम् ॥

(**निवीति** – Garlanding Position **2-T**) **कृष्णद्वैपायनादय: ये ऋषय: तान् ऋषीन् तर्पयामि। सर्वान् ऋषीन् तर्पयामि। सर्व ऋषीर्गणान् तर्पयामि। सर्व ऋषीर्पत्नी: तर्पयामि। सर्व ऋषीर्गण पत्नी: तर्पयामि। प्रजापतिं काण्ड ऋषीं तर्पयामि। सोमं काण्ड ऋषीं तर्पयामि। अग्निं काण्ड ऋषीर्तर्पयामि। विश्वान् देवान् काण्डऋषीन् तर्पयामि** (**उपवीति – Normal Position 1-T**) **साꣳहितीर्देवता: उपनिषद: तर्पयामि। याज्ञकीर्देवता: उपनिषद: तर्पयामि। वारुणीर्देवता: उपनिषद: तर्पयामि।** (**निवीति 2-T**) **हव्यवाहम् तर्पयामि। विश्वान् देवान् काण्डऋषीस्र्तपयामि ॥** (*Then* **1-T** *– lift the hand up and allow the water to flow down into plate by chanting)* **ब्रह्माणं स्वयंभुवं तर्पयामि।** (**2-T**) **विश्वान् देवान् काण्डर्षीꣳ स्तर्पयामि। अरुणान् काण्डर्षीꣳ स्तर्पयामि।** (उपवीति - 1-**T**) **सदसस्पतिं तर्पयामि । ऋग्वेदं तर्पयामि।** (1-**T**) **यजुर्वेदम् तर्पयामि।** (1-**T**) **सामवेदं तर्पतयामि।** (1-**T**) **अथर्व वेदं तर्पयामि ।** (1-**T**) **इतिहासपुराणं तर्पयामि ।** (1-**T**) **कल्पं तर्पयामि ॥**

## ॥ पितृ तर्पणं ॥ (प्राचीनावीति - 3-Times)

(3-T) सोम: पितृमान् यमो अङ्गिरस्वान् अग्नि: कव्यवाहनादय: ये पितर: तान् पितॄन् तर्पयामि । सर्वान् पितॄन् तर्पयामि । सर्व पितृगणान् तर्पयामि । सर्व पितृपत्नी तर्पयामि । सर्व पितृगणपत्नी: तर्पयामि । ऊर्जं वहन्ती: अमृतं घृतं पय: कीलालं परिसृतं स्वधास्थ तर्पयत मे पितॄन् । तृप्यत तृप्यत तृप्यत ॥ (उपवीति) आचामेत् – ब्रह्मयज्ञाग्यं कर्म ओम् तत्सत् ब्रह्मार्पणमस्तु ॥ (आचम्य ।) note: only one Pavithram to be continued until Vedarambam) ।

## ॥ 4. महासङ्कल्प: ॥

(पवित्रपाणि कुर्यात्) ॥ शुक्लाम् भरतरम् विष्णुम् शशिवर्णम् चतुर्भुजम् । प्रसन्नवदनम् ध्यायेत् सर्वविघ्ण उपशान्तये ॥ ॐ भू: ...... भूर्भूवस्सुवरोम् । ममोपात्त समस्त दुरितक्षयद्वार श्री परमेश्वरप्रीत्यर्थम् तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबलं दैवबलं तदेव श्री लक्ष्मीपतेते अङ्ग्रियुगं स्मरामि । ॐ अपवित्र: पवित्रो वा सर्वावस्थां गतोपिवा । यस्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तर: शुचि: । मानसं वाचिकं पापं कर्मणा समुपार्जितम् । श्री राम: स्मरणेनैव व्यपोहति न संशय: । श्रीराम राम राम । तिथिर्विष्णु: तथावार: नक्षत्रं विष्णुरेव च । योगश्च करणश्चैव सर्वं

www.pradosham.com

विष्णुमयं जगत् । श्री गोविन्द गोविन्द गोविन्द । अद्य श्री भगवत: आदिविष्णो: आदिनारायणस्य अचिन्त्यया अपरिमितया शक्त्या भ्रियमाणस्य महाजलौघस्य मध्ये परिभ्रमतां अनेककोटि ब्रह्माण्डानां एकतमे अव्यक्त महत् अहङ्कार पृथिव्यप्तेजोवाय्वाकाशाद्यै: आवरणै: आवृतेऽस्मिन् महति ब्रह्माण्डकरण्डमण्डले आधार शक्ति कूर्म अनन्तादि अष्टदिग्गजोपरि प्रतिष्ठितस्य उपरितले सत्यादि लोकषट्कस्य अधोपाके महानालायमान फणिराज शेषस्य सहस्रफणामणि मण्डलमण्डिते लोकालोक अचलेन परिवृते दिग्दन्ति शुण्डादण्ड उत्तम्भिते लवण इक्षु सुरासर्पि दधि, दुग्ध शुद्धार्णवै: परिवृते जम्भू प्लक्ष शाल्मलि कुश क्रौञ्च शाक, पुषकराख्य, सप्तद्वीपदीपिते इन्द्र, कशेरु, ताम्र, गभस्ति नाक, सौम्य गन्धर्व चारण, भारतादि नवखण्ठात्मके महामेरु, गिरि, कर्णिका, उपेते महा, सर, उरुहायमाण पञ्चाशत्, कोटि, योजन, विस्तीर्ण, भूमण्डले, सुमेरु, निषत, हेमकूट, हिमाचल, माल्यवत् पारियात्रक गन्धमादन कैलास, विन्ध्याचलादि, महाशैल, अधिष्टिते, लवण, समुद्र, मुद्रिते, भारत, किम्पुरुष, हरि, इळावृत, रम्यक, हिरण्मय, गुरुभद्राश्व, केतुमालाख्य, नव, वर्ष, उपशोभिते, जम्बूद्वीपे,भारतवर्षे, भरतखण्डे, मेरो: दक्षिणेपार्श्वे, कर्मभूमौ, स्वाम्यवन्ति कुरुक्षेत्रादि सम भूमध्यरेखाया: पूर्वदिग्भागे विन्ध्याचलस्य दक्षिणदिक्भागे, दण्डकारण्ये गोदावर्या: दक्षिणे तीरे

सकलजगत् स्रष्टु: परार्धद्वय जीविन: ब्रह्मण: प्रथमपरार्थे पञ्चाशदब्दात्मके अतीते पञ्चाशदब्दादौ प्रथमेवर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे अहनि द्वितीये यामे तृतीये मुहूर्ते स्वायम्भुव, स्वारोचिष, उत्तम, तामस, रैवत, चाक्षुषाख्येषु, षट्सु, मनुषु अतीतेषु सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे वर्तमाने शालिवाहन शकाब्दे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्या: सम्वत्सराणां मध्ये .... पराभव नाम सम्वत्सरे दक्षिणायने वर्षे ऋतौ सिम्ह (श्रावण) मासे शुक्ल पक्षे (प्रात: ०९.०९ पर्यन्तम् चतुर्दश्याम् तत:) पौर्णमास्यां शुभतितौ वासर: वासरस्तु गुरु वासर युक्तायां श्रविष्ठा नक्षत्र युक्तायाम् (प्रात: 07.51 पर्यन्तं शोभन तत: अतिगण्ड नाम योग युक्तायाम् (प्रात: 09.09 पर्यन्तं वनजै तत:) भद्रै नाम करण युक्तायां एवङ्गुण विशेषण विशिष्टायां अस्यां वर्तमाणायां (प्रात: ०९.०९ पर्यन्तम् चतुर्दश्याम् तत:) पौर्णमास्यां, शुभतिथौ ममोपात्तसमस्त दुरित क्षयद्वारा श्री परमेश्वर प्रीत्यर्थं अनादि अविद्या वासनया प्रवर्तमाने अस्मिन् महति सम्सारचक्रे विचित्राभि: कर्मगतिभि: विचित्रासु योनिषु पुन: पुन: अनेकधा जनित्वा केनापि पुण्यकर्म विशेषण इदानीम्तन मानुष्ये द्विज जन्म विशेषं प्राप्तवत: मम इहजन्मनि पूर्वजनमनि जन्म जन्मान्तरेषु च बाल्ये वयसि, कौमारे, यौवने, वार्धक्ये च जाग्रत् स्वप्न सुषुप्ति अवस्थासु मनो वाक्काय कर्मेन्द्रिय ज्ञानेन्द्रिय व्यापारै: सम्भावितानां

उपपातकानां सङ्कलीकरणानां मलिनीकरणानां अपात्रीकरणानां जाति भ्रम्शकराणां एवं नवानां नवविधानां बहूनां बहुविधानां सर्वेषां पापानां सद्य: अपनोदनद्वारा समस्त पापक्षयार्थं महागणपत्यादि समस्त हरिहर देवता सन्निधौ, अलर्मेलुमङ्गा अम्बिका समेत प्रसन्न वेङ्कटेश्वर स्वामि सन्निधौ, श्री रङ्गनायकी अम्बिका समेत श्रीरङ्गनाथ स्वामि सन्निधौ, विसालाक्षि अम्बिका समेत विश्वनाथ स्वामि सन्निधौ, कर्पकाम्बा अम्बिका समेत कपालीश्वर स्वामि सन्निधौ, शिवकामि अम्बिका समेत मूलट्टानेश्वर स्वामि सन्निधौ, अभीतकुचलाम्बा अम्बिका समेत अरुणाचलेश्वर स्वामि सन्निधौ, अखिलाण्डेश्वरी अम्बिका समेत जम्बुकेश्वर स्वामि सन्निधौ, कामाक्षी अम्बिका समेत एकाम्रेश्वर स्वामि सन्निधौ, ज्ञानप्रसुराम्बिका अम्बिका समेत काळहस्तीश्वर स्वामि सन्निधौ, मन्ङ्गलाम्बिका अम्बिका समेत आदिकुम्भेश्वर स्वामि सन्निधौ, सुगन्ध कुन्दळाम्बा अम्बिका समेत मातृभूतेश्वर स्वामि सन्निधौ, अभिरामि अम्बिका समेत अमृतकटेश्वर स्वामि सन्निधौ, मङ्गलनायकी अम्बिका समेत श्री वाञ्छिनात स्वामि सन्निधौ, वेदनायकी अम्बिका समेत वेदारण्येश्वर स्वामि सन्निधौ, प्राणाम्बिका अम्बिका समेत दर्भारण्येश्वर स्वामि सन्निधौ, बृहत्कुचलाम्बा अम्बिका समेत मध्यार्जुनेश्वर स्वामि सन्निधौ,

**पर्वतवर्धिनि अम्बिका समेत श्री रामलिङ्गेश्वर स्वामि सन्निधौ, मीनाक्षि अम्बिका समेत सुन्दरेश्वर स्वामि सन्निधौ, गोमति अम्बिका समेत शङ्करनारायण स्वामि सन्निधौ, गोमति अम्बिका समेत स्फुटार्जुनेश्वर स्वामि सन्निधौ, कान्तिमति अम्बिका समेत वेणुवननातेश्वर स्वामि सन्निधौ, वल्ली देवसेना अम्बिका समेत जयन्तिनाथ सुब्रह्मण्येश्वर स्वामि सन्निधौ, पूर्णा पुष्कलाम्बा अम्बिका समेत हरिहर पुत्र स्वामि सन्निधौ, सीता, लक्ष्मण, भरत, शतृघ्ण श्री अभयहस्त आञ्जनेय स्वामि सहित श्री रामचन्द्र स्वामि सन्निधौ, दैवब्राह्मण सन्निधौ श्रावण्यां पौर्णमास्यां अध्यायोपाकर्म कर्मकरिष्ये। तदङ्गं माध्यान्हिक स्नानं करिष्ये।**

## प्रार्थनै:

(1) **अतिक्रूर माहाकाय कल्पान्त दहनोपम। भैरवाय नमस्तुभ्यं अनुज्ञ्यानं** दातुमर्हसि।

**(2) दुर्भोजन दुरालाब दुष्प्रतिग्रह सम्भवम्। पापं हर मम क्षिप्रं सह्यकन्ये नमोस्तुते।**

**(3) त्रिरात्रं जाह्नवीतिरे पाञ्चरात्रन्तु यामुने। सद्य:पुनतु कावेरी पापं आमरणन्तिकं॥**

**(4) गङ्गे गङ्गेति योब्रूयात् योजनानां शतैरपि। मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥**

www.pradosham.com

(5) नन्दि नलिनी सीता मालती च मलापहा । विष्णूपादाब्ज सम्भूता गङ्गाध्या: सरितस्तथा । आगच्छन्तु पवित्राणि स्नान काले सदा मम ॥

(स्नानं उत्तमं – प्रोक्षणम् - मध्यमं) ॥

## ॥ 5. यज्ञोपवीतधारणमन्त्रम् ॥

श्री गणपतिध्यानम्...... "शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुभुजम् । प्रसन्नवदनं ध्यायेत् । सर्वविघ्नोपशान्तये ॥

प्राणायाम: । ॐ भू: ॐ भुव: ओꣳसुव: ॐ मह: ॐ जन: ॐ तप: ओꣳसत्यम्

ॐ तत्सवितुवरेंण्यं भर्गो देवस्य धीमहि धियोयोन: प्रचोदयात् ॥

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थम् श्रौतस्मार्थ विहित नित्यकर्मानुष्ठान सदाचार योग्यता सिद्ध्यर्थं ब्रह्मतेज: अभिवृद्ध्यर्थं यज्ञोपवीतधारणं करिष्ये ॥

यज्ञोपवीतधारण महामन्त्रस्य प्रब्रह्म ऋषि: -- त्रिष्टुप् छन्द:

परमात्मा देवता यज्ञोपवीतधारणे विनियोग: ॥

www.pradosham.com

**यज्ञोपवीतं परमं पवित्रम् प्रजापतेर्यत् सहजं पुरस्तात् । आयुष्यमग्रियं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥** **Remove, keep Pavithram on right-hand ear, do *Aachamanam* and *Angavandhanam* then wear Pavithram say the following Manthram and remove carefully old holy-thread :-**

**उपवीतम् भिन्नतन्तुं जीर्णम् कश्मलदूषितम् । विसृजामि जले ब्रह्मन् वर्चो दीर्घायुरस्तु मे ॥**

**Remove Pavithram, do *Aachamanam and Angavandhanam* again ॥**

([illegible])

## कृष्णाजिनं

**(கீழ்கண்ட மந்திரத்தை உச்சரித்தவாறே சிறிய துண்டு மாந்தோலை (க்ருஷ்ணா-ஜினத்தை) பூணூலுடன் சேர்த்து கட்டிக்கொள்ளவும். *ப்ரஹ்மசாரிகள் மட்டும்)***

**मित्रस्य-चक्षु:धरुणं-बलीय:-तेजः-यशस्वि-स्थविरं समिद्धं । अनाहनस्यं-वसनं-जरिष्णु-परीदं-वाजी-अजिनं-दधेऽहम् क ॥**

## काण्ड-ऋषि-तर्पणम्

**श्रावण्यां पौर्णमास्यां अध्यायोपक्रम-कर्माङ्गम् काण्डऋषि-तर्पणं करिष्ये ॥**

**Remove Pavihram and keep at right-hand ear (निवीति) ।**

**तिलाक्षत-युक्ताद्भि-स्तर्पयति । ऋषितीर्थेन ॥**

**प्रजापतिं-काण्डऋषीं तर्पयामि । (3) ।**

**सोमम् – काण्डऋषीं तर्पयामि । (3) ।**

**अग्निं - काण्डऋसषीं तर्पयामि । (3) ।**

**विश्वान् देवान् - काण्डऋषीं तर्पयामि । (3) ।**

**साꣳहिती-र्देवता उपनिषद: तर्पयामि । (3) ।**

**याज्ञिकीर्देवता उपनिषध: तर्पयामि । (3) ।**

**वारुणीर्देवता उपनिषद: तर्पयामि । (3)**

**ब्रह्माणं स्वयम्भुवं तर्पयामि (3) ।**

**सदस्पतिम् तर्पयामि (3) ॥ (उपवीति) ॥ आचम्य । पवित्राणि कुर्यात्**

**(wear pavithram) ॥**

www.pradosham.com

## ॥ 6. वेदारम्भं ॥

**शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् । सर्वविघ्नोपशान्तये ॥**

**प्राणायाम: । ॐ भू: ॐ भुव: ओ३ँसुव: ॐ मह: ॐ जन: ॐ तप: ओ३ँसत्यम् ॐ तत्सवितुवरेण्यं भर्गो देवस्य धीमहि धियोयोन: प्रचोदयात् ॥ अद्य पूर्वोक्त एवङ्गुण विशेषण विशिश्टायां अस्याम् पौर्णमास्यां शुभतिथौ ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थम् श्रावण्यां पौर्णमास्यां अध्यायोपाकर्माङ्गं अध्ययन आरम्भं करिष्ये (अपौउपस्पृश्य) ॥**

**॥ ॐ श्री गुरुभ्यो नम: हरि ओम् ॥**

**ॐ गणानां त्वा गणपतिगं हवामहे कविं कवीनामुपमश्रवस्तम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ न: शृण्वन्नूतिभि: सीद सादनम् ॥**

**हरि: ओं ॥ हरि: ओं । ॐ इषेत्वोर्जेत्वा वायवस्थ उपायवस्स्थ देवोवस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ॥ आप्यायध्वम् अविघ्रिया: देवभागं ऊर्जस्वती: पयस्वती: प्रजावती: अनमीवा: अयक्ष्मा माव: स्तेनईशत माघसꣳ स: रुद्रस्यहेति: परिव: वृणक्तु ध्रुवा: अस्मिन् गोपतौस्यात बह्वी: यजमानस्य पशून्पाहि । हरि: ओं । हरि: ओम् । सन्धत्तं तन्मे जिन्वतं हरि: ओम् । हरि: ओं ॥**

www.pradosham.com

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवागं सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । हरिः । संज्ञानं विज्ञानं प्रज्ञानं जानत् अभिजानत् । सङ्कल्पमानं उपकल्पमानं उपकलुप्तं कलुप्तं हरिः ओं ॥ हरिः ओं प्रसुग्मन्ता धियसानस्य सक्षणि वरेभिः वरान् अभिसुप्रसीदत । अस्माकं इन्द्रः उभयं जुजोषति यत्सौम्यस्य अन्धसः बुबोधति हरि ओं ।

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥

हरिः ओं । हरिः ओं ॥ ॐ अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥

हरिः ओं ॥ हरिः ओं ॥ ॐ शन्नो देवीरभिष्टय आपो भद्रैन्तु पितये । शय्योरभिस्त्रवन्तु नः ॥

हरिः ओं ॥ हरिः ओं ॥ ॐ अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा । अन्यमाहवनीयं प्रणीय । अग्नीनन्वादधाति ॥ हरिः ओं । हरिः ओं ॥ अथकर्माणि आचाराद्यानि गृह्यन्ते । उदगयन् पूर्वपक्षाहः

**पुण्याहेषु कार्याणि । यज्ञोपवीतिना प्रदक्षिणं हरिः ओं । हरिः ओं ॥ अथ शिक्षां प्रवक्ष्यामि हरिः ओं ॥**

**हरिः ओं । अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः । धर्मज्ञसमयः प्रमाणं वेदाश्च । चत्वारो वर्णाः हरिः ओं । हरिः ओं । अथ वर्णसमाम्नायः । अथ नवादितः समानाक्षराणि । द्वे द्वे सवर्णे ह्रस्वदीर्घ । नप्लुतपूर्वन् । षोडशादितः स्वराः शेषःव्याञ्जनानि हरिः ओं ।**

**हरिः ओं अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जवगडदतष् । ख फ छ ठ थ चटतव् । कपय् । शषसर् । हल् इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि । वृद्धिरादैच् । अदेङ्गुणः हरिः ओम् ।**

**हरिः ओम् । गीर्णश्रेयः । धेनवः श्रीः । रुद्रस्तु नम्यः । भगोहि याज्या । धन्योयं नारी । धनवान् पुत्रः हरिः ओम् । हरिः ओम् । अथातः छन्दसां विवृत्तिं व्याख्यास्यामः हरिः ओम् ।**

**हरिः ओम् ॥ अथातः धर्मजिज्ञासा हरिः ओम् ॥**

**हरिः ओम् ॥ ब्रह्मजिज्ञास हरिः ओम् ॥**

**हरिः ओम् ॥ आभिर्गीर्भिर्यदतोन ऊनमाप्याय हरिवो वर्द्धमानः । यदा स्तोतृभ्यो महिगोत्रा रुजासि भूयिष्ठभाजो अधतेस्याम । ब्रह्म प्रावादिष्म तन्नो माहासीत् ।**

**॥ ॐ शान्तिः शान्तिः शान्तिः ॥**

www.pradosham.com

## ॥ 7. गायत्री जप संकल्प: ॥

आचम्य, पवित्रपाणि: । शुक्लाम् …… शान्तये । ओम् भू: …… ममोपात्त समस्त….. श्री परमेश्वर प्रीत्यर्थम् । शुभे शोभने मुहूर्ते अद्यब्रह्मण: द्वितीय परार्ध श्वेत वराह कल्पे वैवस्वत मन्वन्तरे, अष्टा विम्शति तमे, कलियुगे प्रथमे पादे जम्भूद्वीपे भारत वर्षे भरतकण्ठे मेरो: दक्षिणे पार्श्वे (Those staying in Middle East - पश्चिमे दिग्भागे उत्तरे पार्श्वे अराभ्य महा समुद्रे तीरे केतुमाल्य वर्षे दुबै/शार्जा/अबु दाभि महानगर्यां) शालीवाहन शकाब्दे अस्मिन्, वर्तमाने व्यावहारिके प्रभवादीनां षष्ट्या: सम्वत्सराणां मध्ये ….. पराभव नाम सम्वत्सरे दक्षिणायने वर्ष ऋतौ सिम्ह (श्रावण) मासे (प्रात: 09.48 पर्यन्तं शुक्ल पक्षे – पौणमास्याम् तत:) कृष्ण पक्षे प्रथम्याम् शुभतितौ वासर: वासरस्तु भृगु वासर युक्तायां शतभिषक् नक्षत्र युक्तायाम् (प्रात: 07.23 पर्यन्तं अतिगण्ड तत:) सुकर्म नाम योग युक्तायाम् (प्रात: 09.48 पर्यन्तं भव नाम करण तत:) बालव नाम करण युक्तायां एवङ्गुण विशेषण विशिष्टायां)अस्यां वर्तमाणायां (प्रात: 09.48 पर्यन्तं शुक्ल पक्षे – पौणमास्याम् तत:) कृष्ण पक्षे प्रथम्याम् शुभतिथौ ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर्र प्रीत्यर्थं मिथ्याधीत दोष प्रायश्चित्यार्थं दोषवत्सु अपतनीय प्रायश्चित्यार्थं सम्वथ्सर प्रायश्चित्यार्थं च अष्टोत्र सहस्रसङ्ख्या

**(1008) सावित्रीं (गायत्रीम्) समिधम् महामन्त्रजपम् करिष्ये ॥ (अपऽउपस्पृश्य) ॥**

**(न्यासं) प्रणवस्य ऋषिर्ब्रह्म देवी गायत्री छन्द: परमात्मा देवता भूरादि सप्त व्याहृतीनां अत्रि, भृगु, कुत्स, वसिष्ठ गौतम, काश्यप, आङ्गीरस ऋषय: गायत्री उष्णिक अनुष्टुप् भृहती, पङ्क्ति, तृष्टुप्, जगत्य: छन्दागंसि – अग्नि, वायु, अर्क वागीश वरुण इन्द्र विश्वे देवा: देवता: (10 वार प्राणायामं कुर्यात्) ॥ प्राणायामं समाप्त पर्यन्तं**

**आयात्वित्यनुवकस्य वामदेव ऋषि: । (head), अनुष्टुप् छन्द: । (nostrils), गायत्री देवता । (centre chest) आयातु वरदा देवी अक्षरं ब्रह्मसम्मितम् । गायत्रींछन्दसां मातेदं ब्रह्म जुषस्व न: ॥ ओजोसि सहोसि बलमसि भ्राजोसि – देवानां धाम नामासि – विश्वमसि विश्वायु: सर्वमसि सर्ववायु: अभिभूरों । गायत्रीं आवाहयामि – सावित्रीं आवाहयामि - सरवस्तीं आवाहयामि - सावित्र्या ऋषि: विश्वामित्र: (Head) - निचृद् गायत्री छन्त: - (nostrils) - सविता देवता (centre chest) – गायत्री महामन्त्र जपे विनियोग: ॥ (then recite 1008 Gayathri Japam,**

**do 3 PrAnAyAmam, stand and do upaSthaanam as follows….)**

**ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं गायत्रीं उपस्थानं करिष्ये ॥**

**उत्तमे शिखरे देवीं भूम्यां पर्वत मूर्धनि । ब्राह्मणेभ्यो ह्यनुज्ञानं गच्छ देवि यथा सुखं ॥ (2 वरं प्राणायामं, उपस्थानं कृत्वा) । पर्यन्तं, आचमनं, अङ्गवन्दनं कृत्वा । माध्याह्निकं ब्रह्मयज्ञं च कृत्वा ॥**

**(Note: Gayathri Manthram is used for expiation purpose, therefore Japam should be performed during Sangava Kaalam which is between 8.24 am to 10.48 am)**

www.pradosham.com

# ॥ यजुर्वेद उपाकर्मा ॥

*- Compiled and presented by Eshwar Gopal and Shankar Ramakrishnan -*

***For and On behalf of Pradosham/Panchangam Group***



Kadayanallur Sri Bhoomi NeeLaa Sametha Neelamaninaatha Swamy



***Krishnapuram Sri BalasubramaNya Swami,Sri Abhayahastha Swami***